————————————————————————————————————

# अव्ययीभाव–प्रक्रियायां सोपानानि

————————————————————————————————————

Table of Contents

——————————————————

1. अव्ययीभावसमासः ।
.. 1. पञ्चोपाङ्गानि
2. प्रथमोपाङः
.. 1. अव्ययं इत्यक्ते किम् ?
.. 2. समासकार्ये विशिष्टसंज्ञानां विधानम्  ।
.. 3. अव्ययं समर्थेन सुबन्तेन समस्यते ।
.. 4. सुब्विभक्तिप्रत्ययानां लुक् ।
3. द्वितीयोपाङः
.. 1. पूर्वपद–उत्तरपद–निर्णयम् । उपसर्जनसंज्ञकस्य पूर्वप्रयोगः ।
4. तृतीयोपाङः
.. 1. समस्तपदघटितपदानां विशिष्टसंज्ञानां विधानम् लिङ्गनिर्णयम् च ।
..... 1. अव्ययीभावसंज्ञा ।
..... 2. प्रातिपदिकसंज्ञा ।
..... 3. नपंसकलिङ्गसंज्ञा ।
5. चतुर्थोपाङः
.. 1. अजन्ताङ्गानाम् समासान्तकार्याणि
..... 1. ह्रस्वादेशः
.. 2. हलन्ताङ्गानां समासान्तकार्याणि ।
..... 1. अव्ययभावप्रसङ्गे शरदादिगणे विद्यामानेभ्यः शब्देभ्यः टच् प्रत्यय–विधानम् ।
..... 2. अव्ययीभावे पुल्लिङ्गस्त्रिलिङ्ग–अनन्तपदानाम् टच् योजनम् । टच् तद्धिप्रत्यये परे टेः लोपः ।
..... 3. नपुंसकलिङ्ग–अनन्तपदानां ।
..... 4. अव्ययीभावे विकल्पेन नपुंसकलिङ्ग–अनन्तपदानां टच् योजनम् ।
..... 5. विकल्पाभावपक्षे नकारस्य लोपः ।
..... 6. नदी–पौर्णमासी–अग्रहायणीभ्यः टच् योजनम् विकल्पेन । टच् प्रत्यये परे इकारस्य लोपः ।
..... 7. नदी–पौर्णमासी–अग्रहायणीभ्यः विकल्पाभावपक्षे ह्रस्वादेशः ।
..... 8. झयन्तपदेभ्यः विकलेन टच् प्रत्यययोजनम् ।
6. ़पञ्चमोपाङः
.. 1. सुब्विभक्तिप्रत्ययस्य योजनम्
..... 1. सामाससंज्ञकात् सुब्विधानम् ।

..... 2. अदन्ताङ्गानां अम्–अदेशः पञ्चमीविभक्तिं विहाय । तृतीयसप्तमीविभक्तयोः विकल्पेन अम् आदेशः ।
..... 3. अनदन्तानां सुब्विभक्तिप्रत्ययस्य लुक् ।
7. दुर्यवनम् इत्यत्र णत्वम् प्रक्रिया
8. दुःशकम् / दुश्शकम्
9. निर्मक्षिकम्
10. निश्शीतम् / निःशीतम्
11. अतिनिद्रम्
12. यथार्थे
.. 1. योगार्थे (अनु)
.. 2. वीप्सार्थे (प्रति)
.. 3. यथार्थे (यथा)
.. 4. सदृशार्थे (सह)
13. आनुपूर्वार्थे (अनुक्रमः) – अनु
14. योगपद्यार्थे (युगपद्) (सह)
15. सादृश्यर्थे (तुल्यार्थे) (सह)
16. सम्पत्त्यर्थे
17. यावदधारणे (२–१–८)
18. सुप् प्रतिना मात्रार्थे (२.१.९)
19. अक्षशलाकासङ्ख्याः परिणा (२.१.१०)
20. लक्षणेनाभिप्रती आभिमुख्ये (२.१.१२)
21. अनुर्यत्समाया (२.१.१३)
22. अभ्यासः

1 अव्ययीभावसमासः ।
= = = = = = = = = = = = = = = = = = =

1.1 पञ्चोपाङ्गानि
~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~

1. प्रथमोपाङ्गः
   - समास–संज्ञा विधानम् । – विशिष्टसमाससंज्ञा, सामान्यसंज्ञा
   - प्रतिपदिक–संज्ञा विधानवम् ।
   - अवयवरूपेण स्थिनानां सबन्तानां लोपः ।
2. द्वितीयोपाङ्गः – पूर्वप्रयोगस्य निर्णयम् ।

3. तृतीयोपाङ्गः – लिङ्गवचनान्तस्य निर्णयम् ।
4. चतुर्थोपाङ्गः – समासान्तकार्याणि ।
5. पञ्चमोपाङ्गः – सुब्विभ्क्तियोजनम् ।

2 प्रथमोपाङः
= = = = = = = = = = =

2.1 अव्ययं इत्यक्ते किम् ?
~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~

– सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥

2.2 समासकार्ये विशिष्टसंज्ञानां विधानम् ।
~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~

| *संज्ञा* | *सूत्रम्* |
|---|---|
| समाससंज्ञा | प्राक्कडारात्समासः (२–१–३) |
| अव्ययीभावसंज्ञा | अव्ययीभावः (२–१–५) |
| पदसंज्ञा | सुतिङन्तम् (१–४–१४) |
| प्रातिपदिकसंज्ञा | कृत्तद्धितसमासाश्च (१–२–४३) |

2.3 अव्ययं समर्थेन सुबन्तेन समस्यते ।
~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~

1. सह सपा (२–१–४)
2. अव्ययं
   विभक्ति–समिप–समृद्धि–व्यृद्धि–अर्थाभाव–अत्यय–असंप्रति–शब्दप्रातुर्भाव–पश्चात्–यथा–आनुपूर्व्य–यौगपद्य–सादृश्य–सम्पत्ति–साकल्यान्तवचनेषु (२–१–६)

| *अव्ययार्थः* | *अवय्यम्* | *उदाहरणं* | *विवरणम्* |
|---|---|---|---|
| विभक्तयर्थे | अधि | अधिहरि | हरौ इति |
| समीपार्थे | उप | उपवनम् | वनस्य समीपम् |
| समृद्धयर्थे | सु | सुभिक्षम् | भिक्षाणां समृद्धिः |

व्यृद्ध्यर्थे दुर् दुर्यवनम् यवनानां
व्यृद्धिः
अर्थाभावार्थे निर् निर्मक्षिकम् मक्षिकाणां
अभावः
अत्ययार्थे निर्, निस्, अति अतिहिमम्, निर्हिमम्, निश्शीतम् हिमस्य अत्ययः,
शीतस्य अत्ययः
असंप्रत्यर्थे अति अतिकम्बलम् कम्बलं सम्प्रति न
युज्यते
शब्दप्रातुर्भावार्थे इति इतिहरि हरिशब्दस्य
प्रकाशः
पश्चादार्थे अनु अनुरथम् रथानां पश्चात्
यथार्थे–२ (योग्यता) अनु अनुरूपम्, अनुगुणम्
गुणानां योग्यम्
यथार्थे–३ (वीप्सा) प्रति प्रतिदिनम् दिनं दिनं
प्रति
यथार्थे–१ (अनतिक्रम्य) यथा यथाशक्ति शक्तिम्
अनतिक्रम्य
यथार्थे–४ (मुख्य सादृश्यम्) सह सहरि हरेः
सादृश्यम्
आनुपाव्यार्थे अनु अनुज्येष्ठम् ज्येष्ठस्य
आनुपूर्व्येणु
यौगपद्यार्थे सह सचक्रम् चक्रेण
युगपद् शङ्कं वर्तते ।
सादृश्यार्थे (गौनसादृश्यम्) सह सहरि प्रद्युम्ने
सहरि दरीदृश्यते
सम्पत्तयर्थे (आत्मभावः) सह सक्षत्रम् सक्षत्रं रामः रावणेन सह
युद्धम् अकरोत् ।
साकल्यार्थे सह सतृणम् सः सतृणं
(तृणेन सह) खादति ।
(तृणम् अपि अपरित्यज्य)
अन्तार्थे सह साग्नि अग्निग्रन्थपर्यन्तम्
अधीते ।

3. यथाऽसादृश्ये (२–१–७)
*अव्ययार्थः* *अवय्यम्* *उदाहरणं*
*विवरणम्*
यथार्थे–१ (योग्यता–अर्थे) यथा यथावृद्धम् (ये ये वृद्धाः)ब्रह्मणानां
आमन्त्रयस्व
यथार्थे–२ (वीप्सा–अर्थे) यथा यथारूपम् रूपस्य

योग्यम्
यथार्थे–३ (अनतिक्रम्य–अर्थे) यथा यथाशक्ति शक्तिम् अनतिक्रम्य

4. यावदवधारणे (२–१–८)
*अव्ययार्थः* *अवय्यम्* *उदाहरणं* *विवरणम्*
अवधानार्थे यावत् यावत्पत्रम् (यावन्ति पत्राणि) यावन्ति पत्राणि सन्ति तावन्ति भोजनानि

5. सुप् प्रतिना मात्रार्थे (२.१.९)
*अव्ययार्थः* *अवय्यम्* *उदाहरणं* *विवरणम्*
मात्रार्थे (बिन्दुः, स्तोकं, लेशः, अल्पम् इत्यादयः) प्रति सर्पिःप्रति सर्पिषः लेशः

6. अक्षशलाकासङ्ख्याः परिणा (२.१.१०)
*अव्ययार्थः* *अवय्यम्* *उदाहरणं* *विवरणम्*
द्यूतव्यवहारे पराजय एव अयं समासः परि अक्षपरि अक्षेण विपरीतं वृत्तम् ( वर्तते)
द्यूतव्यवहारे पराजय एव अयं समासः परि शलाकापरि शलाकया विपरीतं वृत्तम् ( वर्तते)
द्यूतव्यवहारे पराजय एव अयं समासः परि एकपरि, द्विपरि, त्रिपरि, चतुष्परि एकेन विपरीतं वृत्तम् ( वर्तते)

7. अपपरिबहिरञ्चवः पञ्चम्या (२.१.१२)
*अव्ययार्थः* *अवय्यम्* *उदाहरणं* *विवरणम्*
वार्जनार्थे अप अपविष्णु संसारः विष्णुं विहाय संसारः अस्ति । विकल्पेन कर्मप्रवचनीयसंज्ञया अप विष्णोः संसारः इति वाक्यम् ।
वार्जनार्थे परि परिविष्णु संसारः विष्णुं विहाय संसारः अस्ति । विकल्पेन कर्मप्रवचनीयसंज्ञया परि विष्णोः संसारः इति वाक्यम् ।
बाह्यार्थे बहिस् बहिर्ग्रामम् बहिः ग्रामात् इति व्यस्थप्रयोगः ।
अञ्चुधातुतः निष्पन्नेन पदेन सह अयं समासः प्राक् प्राग्वनम् प्राक् वनम् इति व्यस्थप्रयोगः ।

8. आङ्मर्यादाभिविद्योः (२.१.१३)
*अव्ययार्थः* *अवय्यम्* *उदाहरणं* *विवरणम्*

मर्यादार्थे (तेन विना) आङ् आसमुद्रं भारतम् समुद्रं विहाय यः भूखण्डः स भारतम् अस्ति । विकल्पेन कर्मप्रवचनीयसंज्ञया आ समुद्रात् भारतम् इति वाक्यम् ।

अभिविधिः (तेन सह) आङ् आकुमारं यशः पाणिनेः पाणिनेः यशः बालकेषु मध्ये अपि प्रसारितः अस्ति। विकल्पेन कर्मप्रवचनीयसंज्ञया आ कुमारेभ्यः यशः पाणिनेः इति वाक्यम् ।

9. लक्षणेनाभिप्रती आभिमुख्ये (२.१.१४)

*अव्ययार्थः* *अवय्यम्* *उदाहरणं* *विवरणम्*

आभिमुख्यार्थे प्रति प्रत्यग्नि शलबाः पतन्ति । महाविभा इति कृत्वा विकल्पेन अग्निं प्रति शलबाः पतन्ति।

(लक्षणेत्थम्भूताखानभागवीप्सासु प्रतिपर्यनवः)।

आभिमुख्यार्थे अभि अभ्यग्नि शलबाः पतन्ति । महाविभा इति कृत्वा विकल्पेन अग्निं अभि शलबाः पतन्ति (अभिरभागे)।

2.4 सुब्विभक्तिप्रत्ययानां लुक् ।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~

- सुपोधातुप्रतिपदिकयोः (२-४-७१)

3 द्वितीयोपाङः
= = = = = = = = = = = = =

3.1 पूर्वपद-उत्तरपद-निर्णयम् । उपसर्जनसंज्ञकस्य पूर्वप्रयोगः ।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

- प्रथमा निर्दिष्टं समास उपसर्जनम् (१-२-४३)
- उपसर्जनम् पूर्वम् (२-२-३०)

4 तृतीयोपाङः
= = = = = = = = = = =

4.1 समस्तपदघटितपदानां विशिष्टसंज्ञानां विधानम् लिङ्गनिर्णयम् च ।
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

~ ~ ~ ~ ~ ~

#### 4.1.1 अव्ययीभावसंज्ञा ।

- अव्ययीभावश्च (१-१-४१)

#### 4.1.2 प्रातिपदिकसंज्ञा ।

- कृत्तद्धितसमासाश्च (१.२.२४)

#### 4.1.3 नपंसकलिङ्गसंज्ञा ।

- अव्ययीभावश्च (२.४.१८)

# 5 चतुर्थोपाङः

## 5.1 अजन्ताङ्गानाम् समासान्तकार्याणि

### 5.1.1 ह्रस्वादेशः

- ह्रस्वोनुंसके प्रातिपदिकस्य (१.२.४७)

## 5.2 हलन्ताङ्गानां समासान्तकार्याणि ।

### 5.2.1 अव्ययभावप्रसङ्गे शरदादिगणे विद्यामानेभ्यः शब्देभ्यः टच् प्रत्यय-विधानम् ।

- अव्ययीभावे शरत्प्रभृतिभ्यः (५.४.१०७)– अस्मिन् गणे एते शब्दाः अन्तर्गता: —– शरद्, विपाश्, अनस्, मनस्, उपानह्, दिव्, हिमवत्, अनडुह्, दिश्, दृश्, सदृश्, चतुर्, त्यद्, तद्, यद्, कियत्, जरायाः जरस् च (गणसूत्रम्), प्रतिपरसमनुभ्योऽक्षणः (गणसूत्रम्), पथिनश्च (गणसूत्रम्) ।
- प्रतिपरसमनुभ्योऽक्ष्णः – गणसूत्रम्
  - समक्षम् – अक्षिणोः योग्यम् – in the presence. उदाहरणं रामायणतः सर्वोपायं तु वर्तिष्ये विनिवर्तयितुं बलात्। _समक्षम्_ अर्यमिश्राणां साधूनां गुणवर्तिनाम्।।2.82.19।।
  - अन्वक्षम् – अक्ष्णोः पश्चात् (अक्षस्य पश्चात्) – immediately following. उदाहरणं रामायणतः तं चापि समनुज्ञाप्य धर्मज्ञस्सीतया सह। राघवश्शोकसम्मूढो जननीमभ्यवादयत्।।2.40.2।। _अन्वक्षं_ लक्ष्मणो भ्रातुः कौशल्यामभ्यवादयत्। अथ मातु स्सुमित्राया जग्राह चरणौ पुनः।।2.40.3।।
- पथिनश्च
  - पथिनम् पथिनम् प्रति → पथिन् + अम् + प्रति + सु → प्रतिपथिन् → प्रतिपथिन् + टच् → प्रतिपथिन् + अ → प्रतिपथ् + अ → प्रतिपथ + अम् → प्रतिपथम्
  - पथः परः → पथिन् + ङिस् + पर + सु → परपथिन् + टच् → परपथिन् + अ → परपथ +
    अम् → परपथम्

5.2.2 अव्ययीभावे पुल्लिङ्गस्त्रिलिङ्ग–अनन्तपदानाम् टच् योजनम् । टच् तद्धिप्रत्यये परे टेः लोपः ।
--------------------------------------------------------------------------------

- अनश्च (४.५.१०८)
- नस्तद्धिते (६.४.१४४) – टे लोपः तद्धिप्रत्यये परे

5.2.3 नपुंसकलिङ्ग–अनन्तपदानां ।
---------------------------

5.2.4 अव्ययीभावे विकल्पेन नपुंसकलिङ्ग–अनन्तपदानां टच् योजनम् ।
--------------------------------------------------------------------------------

- नपुंसकादन्यतरस्याम् (६.४.१०९) – विकल्पेन टच् विधानम्
- नस्तद्धिते (६.४.१४४) – टे लोपः तद्धिप्रत्यये परे

5.2.5 विकल्पाभावपक्षे नकारस्य लोपः ।
-----------------------------------

- नलोपोप्रतिपदिकान्तस्य (८.२.७) - विकल्पाभावपक्षे नकारस्य लोपः

5.2.6 नदी-पौर्णमासी-अग्रहायणीभ्यः टच् योजनम् विकल्पेन । टच् प्रत्यये परे इकारस्य लोपः ।
------------------------------------------------------------------------------

- नदीपौर्णमास्याग्रहायणीभ्यः (६.४.११०)
- यस्येति च (६.४.१४८)- अ/इ वर्णस्य लोपः तद्धिप्रत्यये परे

5.2.7 नदी-पौर्णमासी-अग्रहायणीभ्यः विकल्पाभावपक्षे ह्रस्वादेशः ।
-------------------------------------------------------------

- ह्रस्वोनपुंसके प्रतिपदिकान्तस्य (१-२-४७)

5.2.8 झयन्तपदेभ्यः विकलेन टच् प्रत्यययोजनम् ।
-----------------------------------------

- झयः (६.४.१११)

6 ़पञ्चमोपाङः
===========

6.1 सुब्विभक्तिप्रत्ययस्य योजनम्
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

6.1.1 सामाससंज्ञकात् सुब्विधानम् ।
-------------------------------

- कृत्तद्धितसमासाश्च (१.२.२४)
- स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

6.1.2 अदन्ताङ्गानां अम्–अदेशः पञ्चमीविभक्तिं विहाय । तृतीयसप्तमीविभक्तयोः विकल्पेन अम् आदेशः ।
------------------------------------------------------------------------------

- नाव्ययीभावादतोऽम्त्वपञ्चम्याः (२.४.८३)
- तृतीयासप्तम्योर्बहुलम् (२.४.८४)

6.1.3 अनदन्तानां सुब्विभक्तिप्रत्ययस्य लुक् ।
-----------------------------------------------

- अव्ययादाप्सुपः (२.४.८४)
- अनन्त–नपुंसकलिङ्गशब्दानां अन्तिम–नाकारस्य लोपः ।
  - न लोपः प्रतिपदिकान्तस्य (८–२–७)

7 दुर्यवनम् इत्यत्र णत्वम् प्रक्रिया
= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

1. दुर्यवनम् → दुर् (पदम्) + यवन (पदम्) + अम् → दुर्यवनम् (पदम्)
2. रषाभ्यां नो णः समानपदे (८.४.१)
   - पदच्छेदः – रषाभ्याम्, नः, णः, समानपदे
   - विभक्तिरूपम् – रषाभ्याम्(५.२), नः(६.१), णः(१.१), समानपदे(७.१)
   - स्थानी – नः; निमित्तम् – रषाभ्याम्, समानपदे ; कार्यम् – णकारादेशः
3. दुर्यवनम् → दुर्(पदम्) + यवन(पदम्) + अम्
4. प्रातिपदिकान्तनुम्विभक्तिषु च (८.४.११)+ उत्तरपदम् यत् प्रतिपदिकम् तदन्तस्यैव णत्वम् (वार्तिकम्)
   - प्रतिपदिकान्त–नुम्–विभक्तिषु च
   - विभक्तिरूपम् – प्रतिपदिकान्त–नुम्–विभक्तिषु (७.३) च (अव्ययवम् – वा इति अर्थः)
   - अनुवृत्तिः – स्थानी – नः; निमित्तम् – पूर्वपदात् (५.१), रषाभायाम् (५.१); कार्यम् – णकारादेशः अट्, कुप्, आङ्, नुम् व्यवायेऽपि
   - प्रातिपदिकान्तनकारः – राजन्
   - नुम् आगमः – पचन्, पचन्तौ इव
   - विभक्तिषु – रामेन → राम + टा → राम + इन → रामेन → रामेण
   - दुर्यवनम् → दुर्, य्, अ, व्, अ, न्, अ + अम् → दुर्यवनम् (णत्वम् न भवति)
   - दुर्यवनेन – दुर्यवन + इन → दुर्यवनेन (णत्वम् न भवति)

8 दुःशकम् / दुश्शकम्
= = = = = = = = = = = = = = =

- दुर् + शक + अम्
- खरवसानयोर्विसर्जनीयः (८.३.१५)
- खरवसानयोः (७.२); विसर्जनीयः (१.१)
- स्थानी – रः (अनुवृत्तिः); निमित्तम् – खरि, अवसाने; कार्यम् – विसर्गादेशः
- खर् – ख्, फ्, छ्, ठ्, थ्, च्, ट्, त्, क्, प्, श्, ष्, स्
- दुर् + शक + अम् → दुःशकम्
- विसर्जनीयस्य(६.१) सः(१.१) (८.३.३४)
- दुःशकम् → दुस्शकम् → स्तो श्चुना श्चुः (८.४.४०) → दुश्शकम् (१)
- शर्परे विसर्जनीयः (८.३.३६)
- दुस्शकम् → दुःशकम्
- वा शरि (८.३.३७)
- दुःशकम् (वैकल्पिकरूपम्) (२)

9 निर्मक्षिकम्
= = = = = = = = = = =

- निर्मक्षिकम् → न्, इ, र्, म्, क्ष् (क्, ष्), इ, क, म्
- निर्मक्षिकेन → निर्, मक्षिकेन → निर्(निमित्तम्–१), म्, अ, क्, ष्(निमित्तम्–२), इ, क्, ए, न (विभक्तिप्रत्ययः), अ → निर्मक्षिकेण
- निर्मक्षिक + आ (टा) → टाङसिङसामिनात्स्याः (७–१–१२) → निर्मक्षिक + इन → निर्मक्षिकेन → निर्मक्षिकेण / निर्मक्षिकेन
- टाङसिङसामिनात्स्याः
  - टा–ङसि–ङसाम् (६.३) – स्थानिनः
  - इन–आत्–स्याः (१.३) – आदेशः
  - टा → इन ; ङसि → आत् ; ङस् → स्य (यथासङ्ख्यमनुदेश समानाम्)

10 निश्शीतम् / निःशीतम्
= = = = = = = = = = = = = = = = = = = =

निस् + शीतम् → निरुँ + शीतम् (ससजुषो रुः (८.२.६६)) → निर् + शीतम् → निः + शीतम्
(खरवसानयोर्विसर्जनीयः (८.३.१५)) → निःशीतम् (नित्य रूपम्) → निस् +

शीतम् (विसर्जनीयस्य सः (८.३.३४) (विकल्पेन भवति वा शरि (८.३.३६)) → निश्शीतम् (स्तोः श्चुना श्चुः (८.४.४०) (वैकल्पिकरूपम्)

11 अतिनिद्रम्
= = = = = = = = = = =

अतिनिद्र + टा → अतिनिद्र + इन → अतिनिद्रेन → अतिनिद्र, ए, न्, अ → अतिनिद्रेण

12 यथार्थे
= = = = = = = =

- चतुर्षु अर्थेषु अव्ययीभावसमासः यथार्थे भवति ।
- योगार्थे – अनु इति अव्ययम् यथा अनुरूपम् ।
- वीप्सार्थे – प्रति इति अव्ययम् यथा प्रतिग्रामम् ।
- पदार्थानतिवृत्यर्थे – यथा इति अव्ययम् यथा यथाक्रमम् ।
- सादृश्यर्थे – सह इति अव्ययम् यथा सहरि ।

12.1 योगार्थे (अनु)
~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~

- रूपस्य योग्यम् – अनुरूपम्
  - अयोनिजां हि मां ज्ञात्वा नाध्यगच्छद्विचिन्तयन्। सदृशं च *अनुरूपं* च महीपालः पतिं मम।।2.118.37।।
  - The ruler of the earth knew that I was not born from a woman's womb, and could not find a suitable husband for me after deep reflection.

12.2 वीप्सार्थे (प्रति)
~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~ ~

- विप्सार्थे प्रति इति अव्ययम् ।
- एकं एकं प्रति – प्रत्यकम्
- वृक्षं वृक्षं प्रति – प्रतिवृक्षम्

– "वृक्षं वृक्षं प्रति" इत्यत्र वीप्सायां सत्यां करमप्रवचनीयसंज्ञां भवति – लक्षणेत्थम्भूताख्यानभाववीसासु प्रतिपर्यनवः ।
– अतः वृक्ष इति शब्दस्य द्वितीयाविभक्ति – कर्मप्रवचनीययुक्ते द्वितीया इति सूत्रेण ।
– तु अव्ययं विभक्ति... इति सूत्रेण अव्ययीभावसमासः नित्यः ।
– वीप्सार्थे इदं सूत्रं नित्यम् अस्ति चेत् कर्मप्रवचनीययुक्ते द्वितीया इति सूत्रम् व्यर्थम् भवति ।
– अतः वीप्सार्थे अव्ययं विभक्ति... इति सूत्रेण वैकल्पिकरूपम् एव भवति ।
– प्रतिच्छात्रम् – छात्रं छात्रं प्रति → छात्र अम् प्रति → प्रति छात्र → प्रतिच्छात्र (छे च) → प्रतिच्छात्रम्

12.3 यथार्थे (यथा)
~~~~~~~~~~~~~~~~~

– शक्ति अनतिक्रम्य → शक्ति यथा → यथाशक्ति

12.4 सदृशार्थे (सह)
~~~~~~~~~~~~~~~~~

– हरेः सदृशः – हरि + ङस् + सह → हरि + सह → सहहरि → सहरि (अव्ययीभावे चाकाले)
→ सहरि
– प्रद्यम्ने सहरि दरीदृश्यते । सादृश्यं प्रधानम् अस्ति ।
अभ्यासाः ––
१) भिक्षाणां सम्वृद्धिः २) कुमार्याम् इति ३) भूते इति ४) मणिकायाः समीपम् ४) मनसि इति ५) मातॄणां समीपम् ६) अग्नेः समीपम् ७) गृहस्य अत्ययः ८) भयस्य अभावः ९) स्वप्नः सम्प्रति न युज्यते १०) पतञ्जलेः प्रकाशः ११) रोगस्य अत्ययः १२) अमयस्य अभावः १३) सन्देहस्य अभावः १४) देशस्य अत्ययः

13 आनुपूर्वार्थे (अनुक्रमः) – अनु
= = = = = = = = = = = = = = = = = = = = = = = = = =

– ज्येष्ठस्य आनुपार्वेण → ज्येष्ठ + ङस् + अनु → ज्येष्ठ अनु → अनुज्येष्ठ → अनुज्येष्ठम्

14 योगपद्यार्थे (युगपद्) (सह)
= = = = = = = = = = = = = = = = = = = = = = = = =

– चक्रेण युगपद् → चक्र + टा + सह → चक्र + सह → सहचक्र → (अव्ययीभावे चाकाले) सचक्र
→ सचक्रम्

15 सादृश्यर्थे (तुल्यार्थे) (सह)
= = = = = = = = = = = = = = = = = = = = = = = = = = =

– सदृशः सख्या → सखि + टा + सह → सखि + सह → सहसखि → (अव्ययीभावे चाकाले) →
ससखि

16 सम्पत्त्यर्थे
= = = = = = = = = = = =

– आत्मभावः इति अर्थः धनं वा धान्यं नास्ति ।
– सक्षत्रम् – क्षत्राणां सम्पत्तिः

17 यावदधारणे (२–१–८)
= = = = = = = = = = = = = = = = = = = = = =

- अवधारणे यावत् अव्ययं सुप् सुपा सह अव्ययीभावः समासः ।
- यावत् + श्लोकाः
- यावत् + श्लोक
- यावद् + श्लोक (झलां जशोऽन्ते)
  - झलां (६.३), जश् (१.३), अन्ते (७.१)
  - अनुवृत्तिः – पदस्य (अधिकारसूत्रम् – ८–१–१३)
  - यस्य पदस्य अन्ते झल् वर्णः अस्ति तस्य स्थाने जश् आदेशः ।
  - येन विधिः तदन्तस्य (ग्रहणम्) – तदन्तः – तत्(झल्) अन्तः यस्य सः तदन्तः(यादत्), तस्य ।
  - तादृशपदस्य ग्रहणम् भतवि । अत्र तु स्थानिरूपेण ।
  - यावद् (अलोऽन्तस्य (१–१–५२))
- यावज् + श्लोक (स्तोः श्चुना श्चुः (७.४.४०))
  - स्तोः (६.१), श्चुना (३.१), श्चुः (१.१)
  - स्तोः – सकार–तवर्गयोः (स्थानि), श्चुना – शकार–चवर्गाभ्याम् (निमित्तम्), श्चुः – शकार–चवर्गौ (आदेशः)
  - स्तु – स्, त्, थ्, द्, ध्, न्

- श्चु – श्, च्, छ्, ज्, झ्, ञ्
- यथासङ्ख्यमनुदेशः समानाम् (१–३–१०)
- यावच् + श्लोक (खरि च (८–४–५५)
  - खरि (७.१), झलां (६.३), चर् (१.१), संहितायाम् (८–२–१०८)
  - परः सन्निकर्षः संहिता, स्थानेऽन्तरतमः (इचुयशानां तलु)
- यावच्छलोक (शश्छोऽटि (८–४–६३))
  - शः (६.१), छः (१.१), अटि (७.१), झयः (५.१), पदान्तात्(५.१), वा
  - यावच् + श्लोक (लकारः अट् मध्ये नास्ति – छत्वममीति वाच्यम्)
  - यावच्छलोक, यावच्श्लोक

18 सुप् प्रतिना मात्रार्थे (२.१.९)
= = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

- सुप् मात्रार्थे प्रतिना सुपा सह अव्ययीभावः समासः ।
- सर्पिस् + प्रति
  - राम + सुँ + खादति
  - रामस् + खादति
  - रामरुँ + खादति (ससजुषो रुँः)
  - रामः + खादति (खरवसानयोः विसर्जनीयस्य)
  - राम≍खादति (कुप्वोः(६.२) ≍क≍पौ(१.२) )
  - रामः पठति / राम≍पठति
  - जिह्वामूलीयः – क ख इति कखाभ्यां प्राक् अर्धविसर्गसदृशः जिह्वामूलीयः ।
    (जिह्वामूलम्)
  - उपध्मानीयः – ≍प ≍फ इत् पफाभ्यां प्राक् अर्धविसर्गसदृशः उपध्मानीयः । (औष्ठौ)

19 अक्षशलाकासङ्ख्याः परिणा (२.१.१०)
= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

- चतुर्भिः विपरीतं वृत्तं = चतुष्परि।
  - चतुर् + भिस्+ परि
  - चतुर् + परि (अक्षशलाकासङ्ख्याः परिणा)
  - चतुः + परि (खरवसानयोर्विसर्जनीयः)
  - चतुष् + परि (इदुदुपधस्य चाप्रत्ययस्य (८.३.४१))
  - चतुष्परि

20 **विभाषाः** (२.१.११) = एतद् अधिकारसूत्रम् अस्ति। एतस्मात् सूत्रात् समासविधिः विकल्पेन

भवति। एवं प्राक् यानि सूत्राणि सन्ति तत्र समासः नित्यः भवति।

21 **अपपरिबहिरञ्चवः पञ्चम्या** (२.१.१२) = अप, परि, बहि इत्येते सुबन्ताः तथा अञ्चु इति धातुतः निष्पन्नाः सुबन्ताः पञ्चम्यन्तेन सह विभाषा समस्यन्ते, अव्ययीभावश्च समासो भवति। अनुवृत्ति–सहित–सूत्रम्— **अपपरिबहिरञ्चवः सुपः पञ्चम्या सुपा सह अव्ययीभावःसमासः विभाषा |**

१) अप विष्णोः संसारः = अपविष्णु / अप विष्णोः संसारः। नाम विष्णुं विहाय संसारः अस्ति।
२) परि विष्णोः संसारः = परिविष्णु / परि विष्णोः संसारः । नाम विष्णुं विहाय संसारः अस्ति।
३) बहिर्वनात् = बहिर्वनम्/ बहिर्वनात्|
४) प्राग् वनात् = प्राग्वनम्, प्राग् वनात् | अञ्चु इति धातुतः निष्पन्नः शब्दः प्राक् इति।

22 **आङ् मर्यादाऽभिविध्योः** (२.१.१३) = मर्यादार्थे वा अभिविध्यर्थे विद्यमानस्य आङ् इति अव्ययस्य पञ्चम्यन्तेन समर्थेन सुबन्तेन सह विकल्पेन समासः भवति। अनुवृत्ति–सहित–सूत्रम्—**मर्यादा–अभिविध्योः आङ् सुप् पञ्चम्या सुपा सह अव्ययीभावः समासः विभाषा।**

**मर्यादार्थे –**
१) **आसमुद्रं** भारतदेशः इति वाक्ये, समुद्रं विहाय, समुद्रपर्यन्तं यः भूभागः वर्तते सः भारतदेशः इति | समुद्रं विना या भूमिः वर्तते सा भूमिः भारतदेशः इति अर्थः लभ्यते |
२) आभानुवासरं पाठयति इत्यस्य भानुवासरं विहाय पाठयति इत्यर्थः | तेन विना = भानुवासरेण विना पाठः प्रचलति | भानुवासरपर्यन्तम् इत्यर्थः |

३) **आपाटलिपुत्रं** वृष्टो देवः, आ पाटलिपुत्रात् | अर्थात् पाटलुपुत्रं विहाय वृष्टिः अभवत् |

४) **आमरणं**/ आ मरणात् शङ्काराचार्येण धर्मस्य संरक्षणार्थं विचेष्टितम् |

५) **आमुक्ति** / आ मुक्तेः संसारः अस्ति | मुक्तिपर्यन्तं संसारः अस्ति |

६) सः पुरुषः **आदिनं/ आदिनात्** कार्यं करोति |

**अभिविध्यर्थे** –

१) **आहिमालयम्/** आ हिमालयात् भारतदेशः इति वदामः चेत् हिमालयः अपि भारतदेशे अन्तर्भवति इत्यर्थः | तेन सह नाम आरभ्य इत्यर्थः |

२) **आकुमारम्/** आ कुमारेभ्यः यशः पाणिनेः| अर्थात् पाणिनेः यशः बालकेषु मध्ये अपि

प्रसारितः अस्ति |

३) **आभानुवासरम्/** आ भानुवसरात् पाठयति इत्यस्य भानुवासरे अपि पाठयति इत्यर्थः |
तेन सह = भानुवासरमपि पाठः प्रचलति इत्यर्थः |

४) **आजन्म**/आजन्मनः कृतात् पापात् ईश्वरः मुच्यते | आजन्म नाम जन्म आरभ्य इत्यर्थः |

५) ईश्वरः **आजन्मनि** कृतं पापं दूरीकरोति |

६) **आबहुभ्यः** वर्षेभ्यः एतत् गृहं तस्य एव आसीत् |

७) **आबहुभ्यः** दिनेभ्यः छात्राणां दर्शनम् एव नास्ति |

23 लक्षणेनाभिप्रती आभिमुख्ये (२.१.१२)

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

सम्मुखता (facing, direction) इत्यस्मिन् अर्थे अभि, प्रति च, एतौ द्वौ शब्दौ चिह्नवाचिना सुबन्तेन सह विकल्पेन समस्येते, अव्ययीभावश्च समासो भवति। अनुवृत्ति–सहित–सूत्रम्—— **आभिमुख्ये अभिप्रती सुपौ लक्षणेन सुपा सह अव्ययीभावःसमासः विभाषा।**

- प्रतिविपाशम्
  - विपाशा पदम् इति शरदादिगणे अन्तर्गतम् अस्ति ।
  - विपाशं + प्रति (लक्षणेनाभिप्रती आभिमुख्ये इति सूत्रेण समासो भवति)
  - विपाश् + अम् + प्रति
  - विपाश् + प्रति
  - प्रति + विपाश् (प्रथमा निर्दिष्टं समास उपसर्जनम्)
  - प्रति + विपाश् + टच् (अव्ययीभावे शरत्प्रभृतिभ्यः)
  - प्रति + विपाश् + अ
  - प्रतिविपाशम्

24 **अनुर्यत्समाया (२.१.१३)**

= = = = = = = = = = = = = = = = = = = = = = = = =

यं पदार्थं समया( सामीप्यं) द्योत्यते तेन लक्षणभूतेन अनु इति अव्ययं समस्यते, सः अव्ययीभावश्च समासः भवति । अनुवृत्ति–सहित–सूत्रम्——**अनुः सुप् यत् समया लक्षणेन सुपा सह अव्ययीभावः समासः विभाषा ।**

- अनुः यत्समया, द्विपदमिदं सूत्रम् ।
- यत्समया यस्य समया इति विग्रहः ।
- समीपार्थे अनु इति अव्ययं समीपे विद्यमानेन लक्षणवाचिशब्देन समस्यते ।
- अत्र निकाषात्रयं वर्तते ।
  - विग्रहवाक्ये अनु इति अव्ययं एव प्रयुक्तं भवेत् ।

- अनु इति अव्ययं समीपार्थे प्रयुक्तं भवेत् ।
- लक्षणवाचिपदम् अनु इति अव्ययस्य उपपदं भवेत् ।

- सूत्रार्थविचारः
1. कस्मिन् अर्थे अनु लक्षणार्थेन सूबन्तेन समस्यते ।
   - अनु इति समीपार्थे एव लक्षणार्थेन सूबन्तेन समस्यते ।
   - यथा वनस्य अनु कुटीरः ।
2. किमर्थं "वृक्षं अनु विद्योतते विद्युत् ।" इत्यत्र इदं सूत्रं न प्रवर्तते ।
   - वृक्षं अनु विद्योतते विद्युत् इति वाक्ये अनु लक्षणार्थे अस्ति नाम समीपार्थे नास्ति ।
   - अनुर्लक्षणे इति सूत्रेण अन–शब्दस्य कर्मप्रवचनीयसंज्ञया ।
   - कर्मप्रवचनीयसंज्ञा–प्राप्तायां सत्यां द्वितीयविधानं करमप्रवचनीययुक्ते द्वितीया इति सूत्रेण ।
3. किमर्थं वृक्षस्य समीपं कुटीरः इत्यत्र इदं सूत्रं न प्रवर्तते ।
   - समीपार्थं द्यतयितुं उप इति अव्ययं विहितम् अस्ति "अव्ययं विभक्ति–समिप–समृद्धि–" इति सूत्रेण।
   - वनस्य समीपं कुटीरः वर्तते → उपवानं ग्रामः वर्तते इति समासः ।
4. किमर्थं वृक्षं समया कुटीरः इत्यत्र समासः अनेन सूत्रेण न भवति ।
   - समया इत्युक्ते समीपे इत्यर्थः । यद्यपि सूत्रे समया इति पदप्रयोगः दृश्यते तथापि तत्र यत्समया इति समस्तपदम् अस्ति ।
   - यत्समया – यस्य समया – अनु यस्य समीपवाची, तेन लक्षणभूतेन सह समासः । अर्थात् अनु इति शब्दः लक्षणभूतस्य पदस्य समीपे भवेत् ।
   - अत्र अनु इति पदप्रयोगः न कृतः अतः इदं सूत्रं न प्रवर्तते ।
5. अत्र किमर्थं पाणिनि–महर्षिः समया इति पदम् उपयुज्य यत्समया इति समस्तपदं प्रयुक्तवान् अस्ति इति प्रश्नः ।
   - अत्र समानार्थकं पदं समीपं इति स्वीकुर्मः । अनुयत्समीपं इति सूत्रम् – तर्हि अनु यस्य समीपवाची इति यत्समीपं इति समस्तपदस्य अर्थः भवति । अत्र सूत्रार्थस्य परिवर्तं न दृश्यते ।
   - यदा महर्षिः अनुस्सपीपे इति सूत्रं रचितवान् यथा अव्ययं विभिक्ति–समीप–... इति सूत्रे सप्तमीविभक्तिं उपयुज्य रचितम्, तदा वनस्य समीपं ग्रामः इति वाक्ये, उप इति अव्ययं भवति अपि च अनु इति पदं अपि भवितुं अर्हति । अत्र वयं विभाषा इति कृत्वा अनुस्सपीपे इति सूत्रं रचितवान् इति चिन्तयामः, तदा वनं अनु ग्रामः इति वाक्यं यत्र समासः इष्यते तत्र अनुस्समीपे कार्यं न करोति । यतोऽपि अनु इति पदं एव सामीप्यं द्योतयति । यथा वनस्य समीपं ग्रामः इति स्थाले, उप इति अव्ययं विहितम्, तदृशं अत्र न अनु विहितम् । अतः अनुस्सपीपे इति सूत्रं न रचितवान् ।

25 **यस्य चायामः** (२.१.१६)

यस्य दैर्घ्यसदृशदैर्घ्यम् अनुना द्योत्यते तेन लक्षणभूतेन अनुः समस्यते | यस्य आयामः (दीर्घता) अनु इति शब्दस्य द्वारा बोधितः भवति, तेन लक्षणवाचिना शब्देन सह अनु शब्दः विकल्पेन समस्यते, अव्ययीभावश्च समासो भवति | **यस्य च आयामः अनुना, अनुः सुप् लक्षणेन सुपा सह अव्ययीभावःसमासः विभाषा |**

गङ्गायाः अनु = अनुगङ्गं वारणसी, गङ्गायाः अनु | गङ्गादैर्घ्यसदृशदैर्घ्यम् उपलक्षितम् इत्यर्थः।
गङ्गायाः अनु = अनुगङ्गं हस्तिनापुरम्।

26 **तिष्ठद्गुप्रभृतीनि च** ( २.१. १७) = तिष्ठद्गुगणे पठितानां शब्दानां निपातनं क्रियते, तेषाम् अव्ययीभावसंज्ञा भवति। यानि समस्तपदानि साक्षात् सूत्रेण उच्यन्ते प्रक्रियां विना, तानि निपातनानि।

तिष्ठन्त्यः गावः (दोहनाय) यस्मिन् काले सः = **तिष्ठद्गु** गोदोहनकालः।
आयत्यः गावः यस्मिन् काले सः = **आयतीगवम्** ।
सम्प्रति= सम् च प्रति च द्वयोः समाहारः | **सम्प्रति** – अस्मिन् काले, इदानीम्, अधुना, एतर्हि, सांप्रतम् इति |
**असम्प्रति** = अयोग्ये काले, अनुपस्थितकाले च |

27 **पारे मध्ये षष्ठ्या वा** ( २.१. १८) = पार, मध्य इति शब्दौ षष्ठ्यन्तेन सह विभाषा समस्येते, अव्ययीभावश्च समासो भवति। अनुवृत्ति–सहित–सूत्रम्— **पारे मध्ये सुपौ षष्ठ्या सुपा सह अव्ययीभावः समासः वा विभाषा |**

१) महाभारतस्य मध्यम् = मध्येमहाभारतम् ( अव्ययीभावसमासः) , महाभारतमध्यम् (षष्ठीतत्पुरुषः) , महाभारतस्य मध्यम् ( व्यस्तप्रयोगः)
२) गङ्गायाः मध्यम् = मध्येगङ्गम्, गङ्गामध्यम्, गङ्गायाः मध्यम् ।
३) जलस्य मध्यम् = मध्येजलम्, जलमध्यम्, जलस्य मध्यम् ।

अ) गङ्गायाः पारात् आनय = पारेगङ्गात् आनय / गङ्गापारात् आनय/ गङ्गायाः पारात् आनय
आ) गङ्गायाः मध्यात् = मध्येगङ्गात्/ गङ्गामध्यात्/ गङ्गायाः मध्यात्
इ) मार्गस्य मध्यम् = मध्येमार्गम्, मार्गमध्यम्, मार्गस्य मध्यम् |
ई) सभायाः मध्यम् = मध्येसभम्, सभामध्यम्, सभायाः मध्यम् |

उ) समुद्रस्य पारम् = पारेसमुद्रम्, समुद्रपारम्, समुद्रस्य पारम् |

ऊ) जलस्य मध्यम् = मध्येजलम्, जलमध्यम्, जलस्य मध्यम् |

28 **संख्या वंश्येन** (२.१.१९) = सङ्ख्यावाची शब्दः वंश्यवाचिना शब्देन सह विकल्पेन

समस्यते, अव्ययीभावश्च समासो भवति |

अनुवृत्ति–सहित–सूत्रं— **संख्या सुप् वंश्येन सुपा सह अव्ययीभावः समासः विभाषा |**
वंशस्य प्रतिनिधित्वं द्वे रूपे भवतः– विद्यावंशः, जन्मवंशः च।

द्वौ मुनी वंश्यौ = द्विमुनि, द्वौ मुनी वंश्यौ | यस्मिन् वंशे द्वौ मुनी स्तः | एतत् विद्यावंशस्य उदाहरणम् अस्ति | द्वौ च तौ मुनी चेति विग्रहे **'विशेषणं विशेष्येण बहुलम् (** २.१.५७)'इत्यनेन कर्मधारयं बाधित्वाऽव्ययीभावः भवति।
एकविंशतिभारद्वाजम् /एकविंशतिभारद्वाजात्
एकविंशतिभारद्वाजम् / एकविंशतिभारद्वाजेन, एकविंशतिभारद्वाजम् / एकविंशतिभारद्वाजे |

29 **नदीभिश्च** (२.१.२०) = सङ्ख्यावाचकशब्दः नदीवाचकैः शब्दैः सह विकल्पेन समस्यते, अव्ययीभावश्च समासश्च भवति |

अस्मिन् सूत्रे नदीभिः इति बहुवचनान्तनिर्देशेन ज्ञायते यत् नदीवाचिना शब्देन सह एव समासः भवति न तु स्वरूपात्मकेन नदीशब्देन सह इति।
**समाहारे च अयम् इष्यते** इति वार्तिकम् अस्ति | वार्तिकार्थः अस्ति – प्रकृतसूत्रे विधीयमानः समासः समाहारार्थे एव भवति | अस्मिन् वार्तिके च इति शब्दः एव इति अर्थः सूच्यते | सामान्यतया समाहारार्थे द्विगुसमासः एव विधीयते |

**सप्तगङ्गात् , सप्तगङ्गेन, सप्तगङ्गे** अन्यासु विभक्तिषु **सप्तगङ्गम्** इति रूपं सिद्धं भवति | यस्मिन् पक्षे समासः न भवति तस्मिन् पक्षे सप्तानां गङ्गानां समाहार इति वाक्यं भवति |

सप्तगोदावरम् | पचनदम्। द्वियमुनम् |

30. **अन्यपदार्थे च संज्ञायाम्** ( २.१. २१) = अन्यपदार्थे वर्तमानं सुबन्तं नदीविशेषवाचिना सुबन्तेन सह संज्ञायां विषये समस्यते, अव्ययीभावश्च समासः च भवति |

यत्र सूत्रेषु संज्ञायां विषये समासः विधीयते तत्र समासः नित्यः भवति। अनुवृत्ति–सहित–सूत्रं— **संज्ञायाम् अन्यपदार्थे सुप् नदीभिः सुब्भिः सह अव्ययीभावः समासः।**

उन्मत्ता गङ्गा यस्मिन् = उन्मत्तगङ्गम् ।

उन्मत्ता + गङ्गा → **स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियाऽऽदिषु** (६.३.३४) इति सूत्रेण पूर्वस्त्रिलिङ्गपदस्य पुंवद्भावः भवति → उन्मत्तगङ्गा → **ह्रस्वो नपुंसके प्रातिपदिकस्य (१.२.४७)** इति सूत्रेण अजन्तस्य नपुंसकलिङ्गे प्रातिपदिकस्य हस्वः भवति | अतः उन्मत्तगङ्ग इति भवति |

= = = = = = = = =